## रुच्यर्थानां प्रीयमाणः। (३३/५७१)

रुचिना समानार्थाः रुच्यर्थाः। अन्यकर्तृकोऽभिलाषो रुचिः। रुच्यर्थानां धातूनां प्रयोगे [1]प्रीयमाणो योऽर्थः, तत् कारकं सम्प्रदानसञ्ज्ञं भवति। देवदत्ताय [2]रोचते मोदकः। यज्ञदत्ताय स्वदतेऽ[3]पूपः। देवदत्तस्थस्याभिलाषस्य मोदकः कर्ता। प्रीयमाणः इति किम्? देवदत्ताय रोचते मोदकः पथि॥

## श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः। (३४/५७२)

श्लाघ ह्नुङ् स्था शप इत्येतेषां ज्ञीप्स्यमानो योऽर्थः, तत् कारकं सम्प्रदानसञ्ज्ञं भवति। ज्ञीप्स्यमानः [4]ज्ञपयितुमिष्यमाणः, बोधयितुमभिप्रेतः। देवदत्ताय श्लाघते[5]। देवदत्तं श्लाघमानस्तां श्लाघां [6]तमेव ज्ञपयितुमिच्छति इत्यर्थः। [7]एवम्–देवदत्ताय [8]ह्नुते। यज्ञदत्ताय ह्नुते। देवदत्ताय तिष्ठते। [9]यज्ञदत्ताय तिष्ठते। देवदत्ताय शपते। यज्ञदत्ताय शपते। ज्ञीप्स्यमानः इति किम्? [10]देवदत्ताय श्लाघते पथि॥

## धारेरुत्तमर्णः। (३५/५७३)

धारयतेः [11]प्रयोगे उत्तमर्णो योऽर्थः, तत् कारकं सम्प्रदानसञ्ज्ञं भवति। उत्तममृणं यस्य स उत्तमर्णः। कस्य चोत्तममृणम्? यदीयं धनम्। धनस्वामी प्रयोक्ता उत्तमर्णः, [12]स सम्प्रदानसञ्ज्ञो भवति। देवदत्ताय शतं धारयति। [13]यज्ञदत्ताय शतं धारयति। उत्तमर्णः इति किम्? देवदत्ताय शतं [14]धारयति ग्रामे॥

## स्पृहेरीप्सितः। (३६/५७४)

'स्पृह ईप्सायाम्' (धा.पा. १८७२) चुरादावदन्तः पठ्यते। [15]तस्य ईप्सितो योऽर्थः, तत् कारकं सम्प्रदानसञ्ज्ञं भवति। ईप्सितः इत्यभिप्रेतः उच्यते। पुष्पेभ्यः स्पृहयति। फलेभ्यः स्पृहयति। ईप्सितः इति किम्? पुष्पेभ्यो वने [16]स्पृहयति॥

## क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः। (३७/५७५)

[17]अमर्षः क्रोधः। अपकारो द्रोहः। अक्षमा ईर्ष्या। गुणेषु दोषाविष्करणम् असूया। [18]क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः, तत् कारकं सम्प्रदानसञ्ज्ञं भवति। क्रोधस्तावत् कोप एव। द्रोहादयोऽपि [19]कोपप्रभवा एव गृह्यन्ते। तस्मात् सामान्येन विशेषणं यं प्रति कोपः इति। देवदत्ताय क्रुध्यति। देवदत्ताय द्रुह्यति। देवदत्ताय ईर्ष्यति। देवदत्तायासूयति। यं प्रति कोपः इति किम्? भार्यामीर्ष्यति, मा एनामन्यो द्राक्षीत् इति॥

---

1. प्रियमाणे ब. 2. रोचयते ह. 3. मोदकः अ, दधि ड. 4. ज्ञापयितुम् अ. ब. क. ड. फ. ई. 5. यज्ञदत्ताय श्लाघते इत्यधिकम् फ. 6. श्लाघन्तम् क, ज्ञापयितुं अ. ब. क. ड. फ. 7. एवम् नास्ति फ. 8. अपह्नुते फ. 9. उदाहरणमिदं नास्ति क. 10. देवदत्तं श्लाघते अ. फ, देवदत्तः श्लाघते पमं. 11. धातोः इत्यधिकम् अ, प्रयोगे नास्ति ह. 12. स नास्ति ड. 13. उदाहरणमिदं नास्ति ब. 14. धारयते ग्रामे ह, धारयति शते ब, देवदत्तः शतं धारयति अ. 15. तस्य य ईप्सितोऽर्थः ड, ईप्सितोऽर्थः क. 16. संस्पृहयति फ. 17. अनर्थः ब. 18. कृधाद्यर्थानां धातूनां अ. ह, क्रोधाद्यर्थानां ब. फ. ई. 19. कोपप्रभावाः ब.